# Shrirama Raghava Stotram

# श्रीरामराघवस्तोत्रम्

## Document Information

Text title : Rama Raghava Stotram

File name : rAmarAghavastotram.itx

Category : raama, stotra, shrIdharasvAmI

Location : doc_raama

Transliterated by : NA

Proofread by : NA

Description/comments : From shrIdhara sandesha

Latest update : November 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 10, 2022

*sanskritdocuments.org*

# श्रीरामराघवस्तोत्रम्

(विबुधप्रियावृत्तम्)

आदिकाव्यसुगानसौरसलोलसौख्यपरात्पर
रावणार्दितदेवबन्धविमोचनाय नृदेहभृत् ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ १॥

भानुवंशविभूषणोत्तमलोकपाल जगद्गुरो
लक्ष्मणाग्रज सत्यनिष्ठसुकोसलेन्द्र जगत्पते ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ २॥

ताटकान्तक यज्ञरक्षक कृपाकर
बाहुघातक देवसंस्तुत तापसोत्तमतोषक ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ ३॥

मारकोटिसुवर्णसुन्दरकोटिशः शशिभासुर
पुण्यपावन पादपांसुसमुद्धृतर्षिसतीस्तुत ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ ४॥

चापभञ्जन गर्वशून्यविदेहवन्दित सद्गुरो
आदिशक्तिविदेहजाकरसेविताखिलमङ्गल ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ ५॥

भक्तगर्वविनाशकृत्करुणानिदानशिवङ्कर
जामदग्न्यकलापकर्षक विश्ववन्द्य जगत्पते ।
राम राघव राम राघव राम राघव पाहि मां

राम राघव राम राघव राम राघव शाधि माम् ॥ ६॥

तातभाषितपालनोन्मुखत्यक्तराज्यवनेचर
गूहकार्चित गाङ्गपारित कैकयीसुतसंस्तुत ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ ७॥

दूषणादिखरादिनाशक हेमराक्षसमारक
पक्षिमोक्षद भक्तिदत्तकिरातिनीफलसेवित ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ ८॥

वज्रदेहकपीन्द्रवन्दित वालिबन्धुहितङ्कर
वायुनन्दनभाषितस्वसुदारशोधनसुश्रुत ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ ९॥

तापसोत्तमवन्द्य शङ्करगेय वानरयूथप
दुष्टराक्षससैन्यनाशक धर्मपाल सुखोदय ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ १०॥

लोककण्टकरावणादिकदुष्टवंशनिबर्हण
स्वाङ्घ्रिसेविविभीषणाय तु राज्यदानसुखङ्कर ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ ११॥

भक्तपालन भक्तवत्सल सत्यसन्ध दयाम्बुधे
भक्तदैन्यकुठारदुःखविदार सर्वशुभङ्कर ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ १२॥

जानकीनिजशक्तिमण्डितधर्मराज्यधुरन्धर
ब्रह्मरूप सदैव चिद्घन नित्यसत्य सुखाकर ।
राम राघव राम राघव राम राघव पाहि मां
राम राघव राम राघव राम राघव शाधि माम् ॥ १३॥

इति श्रीश्रीधरस्वामीविरचितं श्रीरामराघवस्तोत्रं सम्पूर्णम् ।

स्थल गिरिनार राममन्दिर
रामनवमी संवत्सरः ः १९४६

श्रीधर - सन्देश

---

*Shrirama Raghava Stotram*

pdf was typeset on November 10, 2022

Please send corrections to *sanskrit@cheerful.com*